**अज्ञातप्रयोजन** ( ajñāta-prayojana ) *adj.* the purpose of which is not known अज्ञातप्रयोजनमिवाविदितसम्बन्धमपि श्रोतुं नाद्रियन्ते शिष्याः Kāśi. i. 7. 16 (*on* 1. 17)

**अज्ञातप्राच्ययोग** ( ajñāta-prācyayoga ) *adj.* who does not know the contact with the former region अज्ञातप्राच्ययोगः परमभिमनुते स्वेन रूपेण चैनम् TattvMu. 5. 57.

**अज्ञातप्रायश्चित्त** ( ajñāta-prāyaścitta ) *n.* unspecified expiation तेषामज्ञातप्रायश्चित्तं यदज्ञातमनाम्नातमिति मध्ये जुहुयात् पुरुषसूक्तं च AVPari. 72(4). 3.

**अज्ञातफल** ( ajñāta-phala ) *n.* **Ai** unknown fruit (i. e. effect) ज्ञाते फले इच्छया तत्साधनेषु पुरुषः प्रवर्तते न त्वज्ञातफलसाधने LalitāTriBh. 330. 12 (*on* 44); **Aii** unknown fruit अनन्तकायमज्ञातफलं रात्रौ च भोजनम् …वर्जयेत् YogS'ā. 3. 6; अज्ञातफलानां भक्षणे मम नियमोऽस्ति SamyaKau. 87. 7; 87. 18; ततः सूरिभिश्चत्वारो नियमा दत्तास्तद्यथा – अज्ञातफलानि न भोक्तव्यानि TīrthaKa. 81. 18; PrabaK. 75. 21; KumāPraPra. 72. 32; 74. 31; **B** *adj.* having an unknown result or effect अप्यज्ञातफलं साक्षान्मान्तरैर्विधिसंश्रयात् । …प्रसंख्यानं फलाय नः BṛĀraUBhVā.( Sambandha. ) 767.

**अज्ञातफलहान** ( ajñātaphala-hāna ) *n.* avoidance of unknown fruits अज्ञातफलहानेन व्रतयोगेन केवलम् । उमकः पञ्चतावाप्तिं न यातः BṛKathāK. 69. 34.

**अज्ञातबन्धु** ( ajñāta-bandhu ) *m.* **i** unknown friend अज्ञातबन्धुरयमृक्षहरीश्वरो मे SaraKaṇṭhā. 604. 3; **ii** unspecified relative अज्ञातबन्धुभिः सह भक्षणे चांद्रायणं कृत्वा पुनःसंस्कारं ( कुर्यात् ) BālamBha. iii. 176. 16 (*on* 3. 290)

**अज्ञातबलवीर्य** ( ajñāta-balavīrya ) *adj.* whose strength and valour are unknown नाज्ञातबलवीर्येषु पुमान् किंचित् प्रयोजयेत् Pañcā. 10. 9.

**अज्ञातबाहु** ( ajñāta-bāhu ) *m.* unknown side of a geometrical figure त्रिज्यानिघ्नं ज्ञातकोटिज्ययाप्तं तच्चापं स्यान्मानमज्ञातवा( ? बा )होः SiddhāTaVi. 158. 21; 159. 3.

**अज्ञातबोधक** ( ajñāta-bodhaka ) *adj.* making known what is unknown अज्ञातबोधकं हि प्रमाणम् SiddhāLeSaṁ. 234. 2.

**अज्ञातबोधवाक्य** ( ajñāta-bodhavākya ) *adj.* who has not understood the words of enlightenment गणभृद्बोधवाक्येन त्वं श्रीश्रेणिकमन्व्यभूः । अज्ञातबोधवाक्यः सन्नहं वैभारपर्वते RauhiC. 459.

**अज्ञातब्रह्मकर्मन्** ( ajñātabrahma-karman ) *adj.* the object of which is the unknown Brahman विज्ञाते ब्रह्मणि स्याद्विधिरयमफलः प्रत्यये तस्य तद्वन्नाज्ञातब्रह्मकर्मा विधिविषय इति प्रत्ययो बुद्धियोग्यः SaṁkṣeS'ā. 1. 455 (i. 330. 22)

**अज्ञातब्रह्मतत्त्व** ( ajñāta-brahmatattva ) *adj.* who has not known the real nature of Brahman (the Supreme Self) अज्ञातब्रह्मतत्त्वस्य दुःसंभाव्यमिदं वचः BṛĀraUBhVā. ii. 1. 90.

**अज्ञातब्रह्मन्** ( ajñāta-brahman ) *n.* Brahman (i. e. the Supreme Self) as unknown अज्ञातब्रह्मण एव एतन्मते ईश्वरत्वेऽपि अज्ञातशुक्ते रजतोपादानत्ववत् तस्य आकाशादिप्रपञ्चोपादानत्वाभिधानासंभवात् JñānBiPra. 2. 27.

**अज्ञातभक्तिरस** ( ajñāta-bhaktirasa ) *adj.* who has not known or experienced the sentiment of devotion अज्ञातभक्तिरसमप्रसरद्विवेकम् …कामाक्षि नैव तव काङ्क्षति दृष्टिपातः MūkaPañ. 1. 99.

**अज्ञातभक्षणदोष** ( ajñātabhakṣaṇa-doṣa ) *m.* sin due to eating (prohibited food) unknowingly कृच्छ्रं प्रथमाम्नानात्प्राजापत्याख्यमज्ञातभक्षणदोषोपशमनार्थमनुतिष्ठेत् । ज्ञातस्य पुनरभक्ष्यभक्षणदोषस्य विशेषतो यत्र यद्विहितं तदेव प्रायश्चित्तं कुर्यात् ManvaMu. 197. 31 (*on* 5. 21)

**अज्ञातभर्तृव्यसना** ( ajñāta-bhartṛvyasanā ) *adj.* ( *f.* ) unaware of the calamity (death) of the husband तावत्स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार ।…अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव KumāSaṁ. 3. 73.

**अज्ञातभागासिद्ध** ( ajñātabhāgāsiddha ) *adj.* unestablished with respect to the unknown portion of the subject न च तत्रायं हेतुः सिद्ध इति अज्ञातभागासिद्धो हेतुरिति TārkiRa. 279. 9.

**अज्ञातभान** ( ajñāta-bhāna ) *n.* manifestation or appearance as unknown अज्ञाततया सर्वस्याज्ञातभानस्येष्टत्वात् GuruCandr. ii. 96. 11.

**अज्ञातभाव** ( ajñāta-bhāva ) *adj.* whose thought or mind is not known अचिन्तनीयं मनसापि लब्धुमज्ञातभावं जनमन्तरेण । … मनोभवः किं नु फलं लभेत KaumuMa. 3. 1; *m.* the state of unintentional (sinful) activity स खल्वज्ञातभावोऽनभिसन्धाय प्राणातिपातकारीत्यत्रापि पूर्ववदेव कर्मबन्धविशेषो द्रष्टव्यः Siddhasena *on* TattvāBh. *on* 6. 7.

**अज्ञातभाषित** ( ajñāta-bhāṣita ) *n.* utterance of an ignorant मर्षणीयमज्ञातभाषितम् PārthPa. 37 (1)

**अज्ञातभुक्तशुद्धि** ( ajñātabhukta-śuddhi ) *f.* purification of the sin due to what is unknowingly eaten चरेत्कृच्छ्रम् … अज्ञातभुक्तशुद्ध्यर्थम् ManuSm. 5. 21 ( ManvaVi. अज्ञायमानदुष्टसंसर्गभुक्तान्नदोषनिवृत्त्यर्थम् )

**अज्ञातभूतसंचार** ( ajñāta-bhūtasañcāra ) *m. n.* name of a forest (in which the movement of animals is not known) अज्ञातभूतसंचारनाम्नारण्येन मालिताम् YogVā. iii. 25. 29.

**अज्ञातभेद** ( ajñāta-bheda ) *adj.* of unknown difference न ह्यनयोरैक्यमस्तीति ज्ञातभेदयोर्व्यधिकरणतया भ्रमः किन्तु … सामानाधिकरण्येनैवाज्ञातभेदयोः IṣṭaSi. 107. 12; 110. 14; अज्ञातभेदग्रहणैर्न बाधकमतिर्भवेत् PrakaPañ. 45. 2.

**अज्ञातम्** (a-jñātam) *adv.* unknowingly, without anybody's knowledge, secretly माता तु तस्याः कौन्तेय दुहित्रे स्वं चरुं ददौ । तस्याश्चरुमथाज्ञातमात्मसंस्थं चकार ह MahāBhā. xii. 49. 15; जमदग्निधेन्वास्ते वत्समानिन्युर्भरतर्षभ । अज्ञातं कार्तवीर्यस्य MahāBhā. xii. 49. 40; i. 38. 19; iv. 66. 25; यदि तत्राज्ञातमेव प्रवेष्टुं स्यादुपायः किं करिष्यति भवान् Avimā. 4. 12 (39); मू( ष्टिता ? षिका )हम् … तीर्थयात्रोन्मुखस्यास्य मात्रा भाण्डं वारितापि विरहविह्वलत्वादज्ञातं प्रविष्टा AvantiKa. 180. 15; अज्ञातं यत्कृतं पापं पश्चात्कृच्छ्रे( ? च्छ्रं ) समाचरेत् HāriS. ii. 1. 61; बभ्रुविभङ्गमगृहीतश( स् )त्रम् अज्ञातमप्रणिहिताङ्गम् यो वल्लभं सपदि दण्डबलेन जित्वा EI. xiii. 279. 11; PāṇḍaC. 3. 208.

**अज्ञातमदविभ्रम** ( ajñāta-madavibhrama ) *adj.* having unrevealed (i. e. concealed) display of pride or pride and erroneous knowledge अज्ञातमदविभ्रमः…जिनानन्दमुनीश्वरम् । जिग्ये वितण्डया बुद्ध्या नन्दाख्यः सौगतो मुनिः PrabhāC. 77. 8.

**अज्ञातमध्यभूमिक** ( ajñāta-madhyabhūmika ) *adj.* intermediate space between which is not known पञ्चदशकरोच्छ्रायवेण्वोरज्ञातमध्यभूमिकयोः । इतरेतरमूलाग्रगसूत्रयुतेर्लम्बमानमाचक्ष्व Līlā. 160; BījGa. 7. 114.

**अज्ञातमन्त्रलिङ्ग** ( ajñātamantra-liṅga ) *n.* phallus the *mantra* for which is not known अज्ञातमन्त्रलिङ्गेषु प्रणवम् … विन्यस्य ĪśānS'iPa. ii. 19. 23 (5. 6)

**अज्ञातमन्मथविकारा** ( ajñāta-manmathavikārā ) *adj.* ( *f.* ) not knowing the emotions of love अज्ञातमन्मथविकारा बाला यथा S'ṛṅgāMañ. (A.) 47. 7.

**अज्ञातमांसास्वाद** ( ajñāta-māṁsāsvāda ) *adj.* not knowing the taste of meat घेवराः किं भक्ष्या वा अभक्ष्याः । ये तु वणिग्ब्राह्मणादयोऽज्ञातमांसास्वादास्तेषां भक्ष्याः KumāPraPra. 95. 24.

**अज्ञातमाज्ञास्यामीन्द्रिय** ( ajñātamājñāsyāmīndriya ) *n.* faculty of resolving to know what is not known त्रीणीन्द्रियाणि । अज्ञातमाज्ञास्यामीन्द्रियम् । आज्ञेन्द्रियम् । आज्ञातावीन्द्रियं च । अज्ञातमाज्ञास्यामीन्द्रियं कतमत् । प्रयोगमार्गे पञ्चदशसु च दर्शनमार्गचित्तक्षणेषु यदिन्द्रियम् AbhidhSa. 75. 25.

**अज्ञातमार्ग** ( ajñāta-mārga ) *m.* unknown or unfamiliar path अहमज्ञातमार्गेण प्रविष्टः…वने SkandP. ii(5). 11. 81.

**अज्ञातमार्गणाभ्यास** ( ajñāta-mārgaṇābhyāsa ) *adj.* to whom the practice (i. e. art) of shooting arrows is unknown भर्तृमित्रोऽपि तद्वने । अज्ञातमार्गणाभ्यासो बभूवानतमस्तकः BṛKathāK. 116. 20.

**अज्ञातमार्गा** ( ajñāta-mārgā ) *adj.* ( *f.* ) tracks in which are not known दिवाप्यज्ञातमार्गाणाम् … भवता विना । दरीणां श्वापदैः शब्दैर्मार्गे ज्ञाताद्य कः प्रिय RauhiC. 80.

**अज्ञातमुख** ( ajñāta-mukha ) *adj.* of unfamiliar face, unacquainted अज्ञातमुखैः…जनैः…अपह्रियमाणेषु विमानेषु NīlaVi. 4. 20.

**अज्ञातमुखभङ्ग** ( ajñāta-mukhabhaṅga ) *adj.* who has never experienced a rebuff त्रैलोक्यैश्वर्यभोक्तायं त्रैलोक्यैकमहाभटः । अज्ञातमुखभङ्गोऽयं त्रैलोक्यस्यैककण्टकः ( रावणः ) AdbhuDa. 8. 15.

**अज्ञातमुख्य** ( ajñāta-mukhya ) *m.* the unknown primary meaning अज्ञातमुख्येष्वमुख्येष्वपि बहुलप्रयोगोऽस्ति NyāySu.( Ja. ) 145B. 7 (*on* i. 1. 1)

**अज्ञातमुख्यसंबन्ध** ( ajñāta-mukhyasambandha ) *m.* unknown relation or connection with the primary meaning न चाज्ञातमुख्यसंबन्धो लक्षणा । अतिप्रसङ्गात् SiddhāSi. i. 30. 26.

**अज्ञातमूर्ति** ( ajñāta-mūrti ) *adj.* of unknown form अज्ञातमूर्तिना । भुवनानि विडम्ब्यन्ते केनचिद्भ्रमदायिना YogVā. i. 26. 31.

**अज्ञातमूल** ( ajñāta-mūla ) *adj.* **A** whose root-cause is unknown यथा चाज्ञातमूलस्य विनाशोऽपि न संभवी । को वा विनाशो नित्यस्य भवेद्व्रजातिशायिनः TattvSaṁ. 3121; **B** whose supporting evidence is unknown तेषामज्ञातमूलानां न ह्यनुज्ञोपपद्यते TantrVā. 143. 21 (*on* i. 3. 7); जीवग्राहं गृहीतः सुरपतिरिति च स्वैरमज्ञातमूलाः…अभवन् भिन्नभिन्नाः प्रवादाः NīlaVi. 16. 19; **C** whose origin or antecedents are unknown न चैतं( ? तत् ) परमं ज्ञानम् …अज्ञातमूल-